श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## कुंती स्तुति



कुंती स्तुति में है प्रचुर भक्ति, वैराग्य और ज्ञान ।
परम नियंता से मांग रही,दुख देने का वरदान ।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्॥**
**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥**

**श्रीमद्भागवतमहापुराणम्**

**प्रथमः स्कन्धः**

**॥ अथाष्टमोऽध्यायः ॥**

### सूत उवाच

**अथ ते सम्परेतानां(म्), स्वानामुदकमिच्छताम् ।**
**दातुं(म्) सकृष्णा गङ्गायां(म्),पुरस्कृत्य ययुः(स्) स्त्रियः ॥ 1॥**

**स्वाना+मुदक+मिच्+छताम्**

**ते निनीयोदकं(म्) सर्वे, विलप्य च भृशं(म्) पुनः ।**
**आप्लुता हरिपादाब्ज- रजः(फ्)पूतसरिज्जले ॥ 2॥**

**निनी+ योदकं(म्), रजः(फ्)+ पूत+ सरिज् +जले**

**तत्रासीनं(ङ्) कुरुपतिं(न्), धृतराष्ट्रं(म्) सहानुजम् ।**
**गान्धारीं(म्) पुत्रशोकार्तां(म्), पृथां(ङ्) कृष्णां(ञ्)च माधवः ॥ 3॥**

**पुत्रशो+ कार्तां(म्)**

सान्त्वयामास मुनिभिर्-हतबन्धूञ्छुचार्पितान् ।
भूतेषु कालस्य गतिं(न्), दर्शयन्नप्रतिक्रियाम् ॥ 4॥

सान्+ त्वया+ मास, हत+ बन्धूञ् + छुचार्+ पितान्,
दर्शयन् + नप्रति +क्रियाम्

साधयित्वाजातशत्रोः(स्),स्वं(म्) राज्यं(ङ्)कितवैर्हृतम् ।
घातयित्वासतो राज्ञः(ख्), कचस्पर्शक्षतायुषः ॥ 5॥

कितवैर्+ हृतम् , कचस्पर्श+ क्षतायुषः

याजयित्वाश्वमेधैस्तं(न्), त्रिभिरुत्तमकल्पकैः ।
तद्यशः(फ्) पावनं(न्) दिक्षु, शतमन्योरिवातनोत् ॥ 6॥

याजयित्वाश् + वमे+ धैस्तं(न्),
त्रिभिरुत्+ तमकल्पकैः, शत+मन्यो+रिवा+ तनोत्

आमन्त्र्य पाण्डुपुत्रां(व्)श्च, शैनेयोद्धवसं(य्)युतः ।
द्वैपायनादिभिर्विप्रैः,पूजितैः(फ्) प्रतिपूजितः ॥ 7॥

शैनेयोद्+ धव+ सं(य्)युतः, द्वैपायना+ दिभिर्+ विप्रैः

गन्तुं(ङ्) कृतमतिर्ब्रह्मन् , द्वारकां(म्) रथमास्थितः ।
उपलेभेऽभिधावन्ती- मुत्तरां(म्) भयविह्वलाम् ॥ 8॥

कृत+ मतिर्+ ब्रह्मन्, उपलेभेऽ+ भिधा+ वन्ती
मुत्+ तरां(म्), भय+ विह् + वलाम्

उत्तरोवाच

पाहि पाहि महायोगिन्- देवदेव जगत्पते ।
नान्यं(न्) त्वदभयं(म्) पश्ये ,यत्र मृत्युः(फ्) परस्परम् ॥ 9॥

त्वद+ भयं(म्)

अभिद्रवति मामीश, शरस्तप्तायसो विभो ।
कामं(न्) दहतु मां(न्) नाथ, मा मे गर्भो निपात्यताम् ॥ 10॥

शरस्+ तप्ता+ यसो, निपात् + यताम्

**सूत उवाच**

**उपधार्य वचस्तस्या, भगवान् भक्तवत्सलः ।**

**अपाण्डवमिदं(ङ्) कर्तुं(न्), द्रौणेरस्त्रमबुध्यत ॥ 11॥**

**अपाण्डव+ मिदं(ङ्), द्रौणे+ रस्त्र+ मबुध्यत**

**तर्ह्येवाथ मुनिश्रेष्ठ, पाण्डवाः(फ्) पञ्च सायकान् ।**

**आत्मनोऽभिमुखान्दीप्ता- नालक्ष्यास्त्राण्युपाददुः ॥ 12॥**

**आत्मनोऽभि+ मुखान् + दीप्ता,**

**नालक्ष्यास् +त्राण्यु + पाददुः**

**व्यसनं(म्) वीक्ष्य तत्तेषा- मनन्यविषयात्मनाम् ।**

**सुदर्शनेन स्वास्त्रेण, स्वानां(म्) रक्षां(म्) व्यधाद्विभुः ॥ 13॥**

**मनन्य+ विषयात् + मनाम्, व्यधाद् + विभुः**

**अन्तः(स्)स्थः(स्) सर्वभूताना- मात्मा योगेश्वरो हरिः ।**

**स्वमाययाऽऽवृणोद्गर्भं(म्), वैराट्याः(ख्) कुरुतन्तवे ॥ 14॥**

**स्वमाययाऽऽ+ वृणोद्+ गर्भं(म्)**

**यद्यप्यस्त्रं(म्) ब्रह्मशिरस्- त्वमोघं(ञ्) चाप्रतिक्रियम् ।**

**वैष्णवं(न्) तेज आसाद्य, समशाम्यद् भृगूद्वह ॥ 15॥**

**यद्यप्+ यस्त्रं(म्), भृगूद् + वह**

**मा मं(व्)स्था ह्येतदाश्चर्यं(म्),सर्वाश्चर्यमयेऽच्युते ।**

**य इदं(म्) मायया देव्या, सृजत्यवति हन्त्यजः ॥ 16॥**

**सर्वाश्चर्य+ मयेऽच्युते, हन्+ त्यजः**

**ब्रह्मतेजोविनिर्मुक्तै- रात्मजैः(स्) सह कृष्णया ।**

**प्रयाणाभिमुखं(ङ्) कृष्ण- मिदमाह पृथा सती ॥ 17॥**

**ब्रह्म+ तेजो+ विनिर्+ मुक्तै**

**प्रयाणा+ भिमुखं(ङ्)**

कुन्त्युवाच

नमस्ये पुरुषं(न्) त्वाऽऽद्य- मीश्वरं(म्) प्रकृतेः(फ्) परम् ।
अलक्ष्यं(म्) सर्वभूताना- मन्तर्बहिरवस्थितम् ॥ 18॥

मन्तर् + बहि+ रवस्थितम्

मायाजवनिकाच्छन्न- मज्ञाधोक्षजमव्ययम् ।
न लक्ष्यसे मूढदृशा, नटो नाट्यधरो यथा ॥ 19॥

माया + जवनिकाच् + छन्न,

मज्ञा+ धोक्षज+ मव्ययम्

तथा परमहं(व्)सानां(म्), मुनीनाममलात्मनाम् ।
भक्तियोगविधानार्थं(ङ्),कथं(म्) पश्येम हि स्त्रियः ॥ 20॥

मुनीना + ममलात् + मनाम्,

भक्ति+ योग+ विधा+ नार्थं(ङ्)

कृष्णाय वासुदेवाय, देवकीनन्दनाय च ।
नन्दगोपकुमाराय, गोविन्दाय नमो नमः ॥ 21॥

नन्दगोप+ कुमाराय

नमः(फ्) पङ्कजनाभाय, नमः(फ्) पङ्कजमालिने ।
नमः(फ्) पङ्कजनेत्राय, नमस्ते पङ्कजाङ्घ्रये ॥ 22॥

पङ्कजाङ्+ घ्रये

यथा हृषीकेश खलेन देवकी,
कं(व्)सेन रुद्धातिचिरं(म्) शुचार्पिता ।
विमोचिताहं(ञ्) च सहात्मजा विभो,
त्वयैव नाथेन मुहुर्विपद्गणात् ॥ 23॥

रुद्धा+ तिचिरं(म्),

मुहुर् +विपद् +गणात्

विषान्महाग्नेः(फ्) पुरुषाददर्शना-

दसत्सभाया वनवासकृच्छ्रतः ।

मृधे मृधेऽनेकमहारथास्त्रतो,

द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः ॥ 24॥

विषान् + महाग्नेः(फ्), वनवास+ कृच्+ छ्रतः,

मृधेऽनेक+ महा+रथास् + त्रतो, द्रौण्यस्+त्रतश्+ चास्म

विपदः(स्) सन्तु नः(श्) शश्वत्- तत्र तत्र जगद्गुरो ।

भवतो दर्शनं(म्) यत्स्या- दपुनर्भवदर्शनम् ॥ 25॥

दपुनर् + भवदर्शनम्

जन्मैश्वर्यश्रुतश्रीभि- रेधमानमदः(फ्) पुमान् ।

नैवार्हत्यभिधातुं(म्) वै, त्वामकिञ्चनगोचरम् ॥ 26॥

जन्मैश् + वर्य+श्रुत+श्रीभि, नैवार् + हत्यभि+ धातुं(म्), त्वा+मकिञ्च+नगोचरम्

नमोऽकिञ्चनवित्ताय, निवृत्तगुणवृत्तये ।

आत्मारामाय शान्ताय, कैवल्यपतये नमः ॥ 27॥

नमोऽ+ किञ्चन+ वित् + ताय, निवृत्+ तगुण+वृत्+ तये

मन्ये त्वां(ङ्) कालमीशान- मनादिनिधनं(म्) विभुम् ।

समं(ञ्) चरन्तं(म्) सर्वत्र, भूतानां(म्) यन्मिथः(ख्) कलिः ॥ 28॥

मना+ दिनिधनं(म्)

न वेद कश्चिद्भगवं(व्)श्चिकीर्षितं(न्),

तवेहमानस्य नृणां(म्) विडम्बनम् ।

न यस्य कश्चिद्दयितोऽस्ति कर्हिचिद् ,

द्वेष्यश्च यस्मिन् विषमा मतिर्नृणाम् ॥ 29॥

कश्चिद्+ भगवं(व्)श्+ चिकीर्षितं(न्)

कश्चिद्+ दयितोस्ति, कर्+ हिचिद्

जन्म कर्म च विश्वात्मन्-नजस्याकर्तुरात्मनः ।
तिर्यङ्नृषिषु यादः(स्)सु, तदत्यन्तविडम्बनम् ॥ 30॥

तिर्यङ्नृ+षिषु ,

तदत् +यन्त + विडम् +बनम्

गोप्याददे त्वयि कृतागसि दाम तावद्,
या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम् ।
वक्त्रं(न्) निनीय भयभावनया स्थितस्य,
सा मां(म्) विमोहयति भीरपि यद्बिभेति ॥ 31॥

दशा+ श्रुकलि+ लाञ्जन+ सम्भ्र+ माक्षम्,

यद्+ बिभेति

केचिदाहुरजं(ञ्) जातं(म्), पुण्यश्लोकस्य कीर्तये ।
यदोः(फ्) प्रियस्यान्ववाये, मलयस्येव चन्दनम् ॥ 32॥

पुण्यश्+ लोकस्य,

प्रियस् + यान् + ववाये

अपरे वसुदेवस्य, देवक्यां(म्) याचितोऽभ्यगात् ।
अजस्त्वमस्य क्षेमाय, वधाय च सुरद्विषाम् ॥ 33॥

अजस् + त्वमस्य,

सुरद्+ विषाम्

भारावतारणायान्ये, भुवो नाव इवोदधौ ।
सीदन्त्या भूरिभारेण, जातो ह्यात्मभुवार्थितः ॥ 34॥

ह्यात्म+ भुवार्+ थितः

भवेऽस्मिन् क्लिश्यमानाना- मविद्याकामकर्मभिः ।
श्रवणस्मरणार्हाणि, करिष्यन्निति केचन ॥ 35॥

क्लिश्य+मानाना,

श्रवणस् + मरणार् + हाणि, करिष्यन् + निति

श्रृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः(स्),
स्मरन्ति नन्दन्ति तवेहितं(ञ्) जनाः ।
त एव पश्यन्त्यचिरेण तावकं(म्),
भवप्रवाहोपरमं(म्) पदाम्बुजम् ॥ 36॥

गृणन्त्य+ भीक्ष्णशः,
पश्यन्त्य+ चिरेण, भव+ प्रवाहो+ परमं(म्)

अप्यद्य नस्त्वं(म्) स्वकृतेहित प्रभो,
जिहाससि स्वित्सुहृदोऽनुजीविनः ।
येषां(न्) न चान्यद्भवतः(फ्) पदाम्बुजात्,
परायणं(म्) राजसु योजितां(व्)हसाम् ॥ 37॥

स्वित्+ सुहृदोऽ+ नुजीविनः,
चान्यद्+ भवतः(फ्)

के वयं(न्) नामरूपाभ्यां(म्),यदुभिः(स्) सह पाण्डवाः ।
भवतोऽदर्शनं(म्) यर्हि, हृषीकाणामिवेशितुः ॥ 38॥

हृषी+ काणा+ मिवेशितुः

नेयं(म्) शोभिष्यते तत्र, यथेदानीं(ङ्) गदाधर ।
त्वत्पदैरङ्किता भाति, स्वलक्षणविलक्षितैः ॥ 39॥

त्वत् + पदै+रङ्किता, स्व+लक्षण+ विलक्षितैः

इमे जनपदाः(स्) स्वृद्धाः(स्),सुपक्वौषधिवीरुधः ।
वनाद्रिनद्युदन्वन्तो, ह्येधन्ते तव वीक्षितैः ॥ 40॥

सुपक्व +वौषधि + वीरुधः, वनाद्रि+ नद्यदन् + वन्तो

अथ विश्वेश विश्वात्मन्, विश्वमूर्ते स्वकेषु मे ।
स्नेहपाशमिमं(ञ्) छिन्धि, दृढं(म्) पाण्डुषु वृष्णिषु ॥ 41॥

स्नेह+पाश+मिमं(ञ्)+छिन्धि

त्वयि मेऽनन्यविषया, मतिर्मधुपतेऽसकृत् ।
रतिमुद्वहतादद्धा, गङ्गेवौघमुदन्वति ॥ 42॥

मतिर् +मधुपतेऽ+ सकृत् ,
रति + मुद् + वहता+दद्धा ,गङ्गे+वौघ + मुदन्वति

श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्-
राजन्यवं(व्)शदहनानपवर्गवीर्य ।
गोविन्द गोद्विजसुरार्तिहरावतार,
योगेश्वराखिलगुरो भगवन्नमस्ते ॥ 43॥

वृष्ण्यृषभा+ वनिध्रुग् ,
राजन्+ यवं(व्)श+ दहना+ नपवर्ग+वीर्य,
गोद्विज+ सुरार्+ तिहरा+ वतार, योगेश्वरा+ खिलगुरो

सूत उवाच

पृथयेत्थं(ङ्) कलपदैः(फ्), परिणूताखिलोदयः ।
मन्दं(ञ्) जहास वैकुण्ठो, मोहयन्निव मायया ॥ 44॥

परिणूता+ खिलोदयः, मोहयन् + निव

तां(म्) बाढमित्युपामन्त्र्य, प्रविश्य गजसाह्वयम् ।
स्त्रियश्च स्वपुरं यास्यन्, प्रेम्णा राज्ञा निवारितः ॥ 45॥

बाढमित्+ युपा+ मन्त्र्य, गजसाह् + वयम्

व्यासाद्यैरीश्वरेहाज्ञैः(ख्), कृष्णेनाद्भुतकर्मणा ।
प्रबोधितोऽपीतिहासैर्-नाबुध्यत शुचार्पितः ॥ 46॥

व्यासा+ द्यैरीश्+ वरेहाज्ञैः(ख्),
कृष्णेनाद्+ भुतकर्मणा, प्रबोधितोऽ+पीति+हासैर्

आह राजा धर्मसुतश्- चिन्तयन् सुहृदां(म्) वधम् ।
प्राकृतेनात्मना विप्राः(स्), स्नेहमोहवशं(ङ्) गतः ॥ 47॥

प्राकृते+ नात्मना, स्नेह+ मोह+ वशं(ङ्)

अहो मे पश्यताज्ञानं(न्),हृदि रूढं(न्) दुरात्मनः ।
पारक्यस्यैव देहस्य, बह्व्यो मेऽक्षौहिणीर्हताः ॥ 48॥

पारक् + यस्यैव,
मेऽक्षौ+ हिणीर् + हताः

बालद्विजसुहृन्मित्र-पितृभ्रातृगुरुद्रुहः ।
न मे स्यान्निरयान्मोक्षो, ह्यपि वर्षायुतायुतैः ॥ 49॥

बालद्विज+ सुहृन्मित्र,
पितृ+ भ्रातृ+ गुरुद्रुहः, स्यान्+ निरयान्+ मोक्षो

नैनो राज्ञः(फ्) प्रजाभर्तुर् - धर्मयुद्धे वधो द्विषाम् ।
इति मे न तु बोधाय, कल्पते शासनं(म्)वचः ॥ 50॥

प्रजा+ भर्तुर्

स्त्रीणां(म्) मद्धतबन्धूनां(ङ्),द्रोहो योऽसाविहोत्थितः ।
कर्मभिर्गृहमेधीयैर्- नाहं(ङ्) कल्पो व्यपोहितुम् ॥ 51॥

मद्+ धत+ बन्धूनां(ङ्),
योऽसावि+ होत्थितः, कर्मभिर् + गृह+ मेधीयैर्

यथा पङ्केन पङ्काम्भः(स्),सुरया वा सुराकृतम् ।
भूतहत्यां(न्) तथैवैकां(न्), न यज्ञैर्मार्ष्टुमर्हति ॥ 52॥

यज्ञैर् + मार्ष्टु+ मर्हति

इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्) सं(व्)हितायां(म्)
प्रथमस्कन्धे कुन्तीस्तुतिर्युधिष्ठिरानुतापो नामाष्टमोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।